|| श्रीः ||

गीर्वाणज्योतिः मूलसंस्कृत-संहिता-ग्रन्थमाला

(११) एकादशं पुष्पम्

श्रीमम्मटभट्टविरचितः

काव्यप्रकाशः

द्वितीयः उल्लासः

शब्दार्थस्वरूपनिर्णयः

सम्पादकः

डॉ. शिवदास कुण्डलिक जाधव

गीर्वाणज्योतिः प्रकाशनम्, सातारा

इ.स. २०२१ प्रथमावृत्तिः शके १९४३



|| श्रीः ||

गीर्वाणज्योतिः मूलसंस्कृत-संहिता-ग्रन्थमाला

(११) एकादशं पुष्पम्

श्रीमम्मटभट्टविरचितः

काव्यप्रकाशः

द्वितीयः उल्लासः

शब्दार्थस्वरूपनिर्णयः

डॉ. शिवदास कुण्डलिक जाधव

महाराष्ट्रराज्य-महाकवि-कालिदास-संस्कृतसाधना-पुरस्कारेण सम्मानितः

भूतपूर्वः संस्कृत-विभाग-प्रमुखः

छत्रपती शिवाजी महाविद्यालयः, सातारानगरम्

गीर्वाणज्योतिः प्रकाशनम्, सातारा

इ.स. २०२१ प्रथमावृत्तिः शके १९४२

मम्मटभट्टविरचितः

काव्यप्रकाशः (द्वितीयः उल्लासः)

======================================

सम्पादकः	:	**डॉ. शिवदास कुण्डलिक जाधव**
		भूतपूर्वः संस्कृत-विभागप्रमुखः, छत्रपतिः शिवाजी महाविद्यालयः, सातारानगरम्
आवृत्तिः	:	प्रथमा आवृत्तिः
प्रकाशनदिनाङ्कः	:	**२५ मे २०२१, वैशाख-शु.१४; परशुराम-जयन्ती**
प्रकाशिका	:	**सौ. सुमित्रा जाधव**
	:	गीर्वाणज्योति प्रकाशन
		सातारा शाखा :
		कारंजकर नगर, पारशी विहिरीजवळ, विलासपूर, सातारा, ४१५००१
		पुणे शाखा :
		एच.१०३, भास्करा सोसायटी, डीसके विश्व, धायरी, पोस्ट नांदेड, पुणे, ४११६८
		मुंबई शाखा :
		४/४७, उदय को-हौ. सोसायटी, आरे रोड, गोरेगांव [प.], मुंबई, ४०००१०४
संपर्क	:	**Mobile: +919822097507**
Email	:	**geerwanajyotiprakashan@gmail.com**
Website	:	www.geerwanjyoti.in

अनुक्रमणिका

मम्मटभट्टविरचितः

काव्यप्रकाशः

।। द्वितीयः उल्लासः ।।

क्रमेण शब्दार्थयोः स्वरूपमाह –

[सूत्रम् - ५]

स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।

अत्रेति काव्ये। एषां स्वरूपं वक्ष्यते।।

[सूत्रम् - ६]

वाच्यादयस्तदर्थाः स्युः ।

वाच्य-लक्ष्य-व्यङ्ग्याः।।

[सूत्रम् - ७]

तात्पर्यार्थोऽपि केषुचित् ।।६।।

आकाङ्क्षा-योग्यता-संनिधिवशाद् वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीति 'अभिहिनान्वयवादिनां' मतम्।। वाच्य एव वाक्यार्थ इति 'अन्विताभिधानवादिनः'।।

[सूत्रम् - ८]

सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।

तत्र वाच्यस्य यथा -

"माए घरोवअरणं अज्ज हु णत्थित्ति साहिअं तुमए।

ता भण किं करणिज्जं एमेअ ण वासरो ठाइ" ।।६।।

[मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया |

तद्भण किं करणीयमेवमेव न वासर: स्थायी ||६|| इति संस्कृतम्]

अत्र स्वैरविहारार्थिनीति व्यज्यते।

लक्ष्यस्य यथा -

साहेन्ती सहि सुहअं खणे खणे दूम्मिआसि मज्झकए।

सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ।।७।।

[साहयन्ति सखि सुभगं क्षणे क्षणे दूनासि मत्कृते।

सद्भावस्नेहकरणीयसदृशकं तावद् विरचितं त्वया।।७।। इति संस्कृतम्]

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितम् इति लक्ष्यम् | तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्।

व्यङ्ग्यस्य यथा -

उअ णिच्चलणिप्पंदा भिसिणीपत्तम्मि रेहइ बलाआ।
णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्ति व्व ।।८।।

[पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका।

निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ।।८।।इति संस्कृतम्]

अत्र निष्पन्दत्वेन, आश्वस्तत्वम् | तेन च जनरहितत्वम् | अतः संकेतनमेतदिति कयाचित् कंचित् प्रति उच्यते। अथवा मिथ्या वदसि न त्वमत्रागतोऽभूरिति व्यज्यते।।

वाचकादीनां क्रमेण स्वरूपमाह -

[सूत्रम् - ९]

साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः ।।७।।

इहागृहीतसङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् सङ्केतसहाय एव शब्दोऽर्थ-विशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः।

[सूत्रम् - १०]

संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा।

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव, तथाप्यानन्त्याद् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यते, इति 'गौः शुक्लः चलो डित्थः' इत्यादीनां विषयविभागो न प्राप्नोतीति च, तदुपाधावेव सङ्केतः।

उपाधिश्च द्विविधः -

वस्तुधर्मो वक्तृयदृच्छासंनिवेशितश्च। वस्तुधर्मोऽपि द्विविधः -- सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः -- पदार्थस्य प्राणप्रदो विशेषाधान-हेतुश्च । तत्राद्यो जातिः | उक्तं हि वाक्यपदीये -- " न हि गौः स्वरूपेण गौर्नाप्य-गौः, गोत्वाभिसम्बन्धात्तु गौः" इति।

द्वितीयो गुणः। शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते।

साध्यः पूर्वापरीभूतावयवः क्रियारूपः।

डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति।

"गौः शुक्लश्चलो डित्थ" इत्यादौ 'चतुष्टयी शब्दानां प्रवृत्तिः' इति महाभाष्यकारः।

परमाण्वादीनान्तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम्।

गुण-क्रिया-यदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदाद् भेद इव लक्ष्यते।

यथैकस्य मुखस्य खड्ग-मुकुर-तैलाद्यालम्बनभेदात्।

हिम-पयः-शङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु

शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादि सामान्यम्। गुडतण्डुलादिपाकादिष्वेवमेव पाकत्वादि। बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च, प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये।

तद्वानपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम्।।

[सूत्रम् - ११]

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ।।८।।

स इति साक्षात् सङ्केतितः। अस्येति शब्दस्य।।

[सूत्रम् - १२]

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।

अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ।।९।।

“कर्मणि कुशलः” इत्यादौ दर्भग्रहणाद्ययोगात्,

“गङ्गायां घोषः” इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवात्, मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्ये च सम्बन्धे, रूढितः प्रसिद्धेः, तथा गङ्गातटे घोष इत्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिः, तेषां पावनत्वादीनां धर्माणां तथाप्रतिपादनात्मनः प्रयोजनाच्च मुख्येन अमुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा।

[सूत्रम् - १३]

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।

उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ।।१०।।

'कुन्ताः प्रविशन्ति', 'यष्टयः प्रविशन्ति' इत्यादौ कुन्तादिभिरात्मनः प्रवेश-सिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते। तत उपादानेनेयं लक्षणा।

'गौरनुबन्ध्यः' इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्य-क्तिराक्षिप्यते, न तु शब्देनोच्यते 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायात् ।

इत्युपादानलक्षणा तु नोदाहर्तव्या। न ह्यत्र प्रयोजनमस्ति न वा रूढिरियम्। व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते।

यथा - 'क्रियताम्' इत्यत्र कर्ता। 'कुरु' इत्यत्र कर्म।

'प्रविश', 'पिण्डीम्' इत्यादौ 'गृहम्' 'भक्षय' इत्यादि च।

'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्र च रात्रिभोजनं न लक्ष्यते, श्रुतार्थापत्ते-रर्थापत्तेर्वा तस्य विषयत्वात्।

'गङ्गायां घोषः' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थम-र्पयति, इत्येवमादौ लक्षणेनैषा लक्षणा।

उभयरूपा चेयं शुद्धा, उपचारेणामिश्रितत्वात्।

अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम्। तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः। गङ्गासम्बन्ध-मात्रप्रतीतौ तु 'गङ्गातटे घोषः' इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः।।

[सूत्रम् - १४]

सारोपान्या तु यत्रोक्तौ विषयी विषयस्यथा।।

आरोप्यमाणः, आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा।।

[सूत्रम् - १५]

विषय्यन्तःकृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ।।११।।

विषयिणारोप्यमाणेनान्तःकृते निगीर्णे, अन्यस्मिन्नारोपविषये सति साध्यवसाना स्यात्।।

[सूत्रम् - १६]

भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा।

गौणौ शुद्धौ च विज्ञेयौ

इमौ आरोपाध्यवसानरूपौ सादृश्यहेतू भेदौ 'गौर्वाहीकः' इत्यत्र 'गौरयम्' इत्यत्र च।

अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्द-स्य परार्थाभिधाने प्रवृत्तिनिमित्तेत्वमुपयान्ति, इति केचित्।

स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न परार्थोऽभिधीयते, इत्यन्ये। साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यते, इत्यपरे।

उक्तं चान्यत्र –

"अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।

लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ||" इति।

अविनाभावोऽत्र सम्बन्धमात्रं न तु नान्तरीयकत्वम्।

तत्त्वे हि 'मञ्चाः क्रोशन्ति' इत्यादौ न लक्षणा स्यात्। अविनाभावे चाक्षेपेणैव सिद्धे-र्लक्षणाया नोपयोग इत्युक्तम्।

'आयुर्गृतम्' 'आयुरेवेदम्' इत्यादौ च सादृश्यादन्यत् कार्यकारणभावादि सम्बन्धान्तरम्। एवमादौ च कार्यकारणभावादिलक्षणपूर्वे, आरोपाध्यवसाने।

अत्र गौणभेदयोर्भेदेऽपि तादूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम्। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि।

क्वचित् तादर्थ्यादुपचारः। यथा, इन्द्रार्था स्थूणा, 'इन्द्रः'। क्वचित् स्वस्वामिभावात्। यथा, राजकीयः पुरुषो 'राजा'। क्वचित् अवयवावयविभावात्। यथा अग्रहस्त इत्यत्राग्रमात्रेऽवयवे 'हस्तः'। क्वचित् तात्कर्म्यात्। यथा अतक्षा 'तक्षा'।।

[सूत्रम् - १७]

लक्षणा तेन षड्विधा ।।१२।।

आद्यभेदाभ्यां सह।।

सा च -

[सूत्रम् - १८]

व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने।

प्रयोजनं हि व्यञ्जन-व्यापारगम्यमेव।।

[सूत्रम् - १९]

तच्च गूढमगूढं वा।

तच्चेति व्यङ्ग्यम्।

गूढं यथा ---

मुखं विकसितस्मितं वशितवक्रिम प्रेक्षितं

समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः।

उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं

बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ।।९।।

अगूढं यथा ---

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्।

उपदिशति कामिनीनां यौवनमद एव ललितानि ।।१०।।

अत्रोपदिशतीति।।

[सूत्रम् - २०]

तदेषा कथिता त्रिधा ।।१३।।

अव्यङ्ग्या, गूढव्यङ्ग्या, अगूढव्यङ्ग्या च।।

[सूत्रम् - २१]

तद्भूर्लाक्षणिकः।

'शब्द' इति संबध्यते। तद्भूस्तदाश्रयः।।

[सूत्रम् - २२]

तत्र व्यापारो व्यञ्जनात्मकः।

कुत इत्याह ---

[सूत्रम् - २३]

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।।१४।।

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया।

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीति-रपि तु तस्मादेव शब्दात्। न चात्र व्यञ्जनादृतेऽन्यो व्यापारः।।

तथाहि --

[सूत्रम् - २४]

नाभिधा समयाभावात्।

'गङ्गायां घोषः' इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः सङ्केतिताः।।

[सूत्रम् - २५]

हेत्वभावान्न लक्षणा ।।१५।।

मुख्यार्थबाधादित्रयं हेतुः।।

तथा च -

[सूत्रम् - २६]

लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।

न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ।।१६||

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति, तद्वत् यदि तटेऽपि

सबाधः स्यात् तत् प्रयोजनं लक्षयेत्। न च तटं मुख्योऽर्थः। नाप्यत्र बाधः। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः। नापि प्रयोजने लक्ष्ये किंचित् प्रयोजनम्। नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थः।।

[सूत्रम् - २७]

एवमप्यनवस्था स्याद् या मूलक्षयकारिणी।

एवं प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण, तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृत् अनवस्था भवेत्।।

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते। "गङ्गायास्तटे घोषः" इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च प्रयोजनमिति विशिष्टे लक्षणा | तत्किं व्यञ्जनयेत्याह -

[सूत्रम् - २८]

प्रयोजनेन सहितं लक्षणीयं न युज्यते ।।१७।।

कुत इत्याह -

[सूत्रम् - २९]

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।

प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वा।

[सूत्रम् - ३०]

विशिष्टे लक्षणा नैवं

व्याख्यातम् ।

[सूत्रम् - ३१]

विशेषाः स्युस्तु लक्षिते ।।१८।।

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधा-तात्पर्य-लक्षणाभ्यो व्यापारान्तरेण गम्याः। तच्च व्यञ्जन-ध्वनन-द्योतनादिशब्दवाच्यमवश्यमेषितव्यम् ।।

एवं लक्षणामूलं व्यञ्जकत्वमुक्तम् ।।१८।।

अभिधामूलं त्वाह -

[सूत्रम् - ३२]

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।

संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ।।१९।।

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।

अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः।।

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।"

इत्युक्तदिशा

'सशङ्खचक्रो हरिः', 'अशङ्खचक्रो हरिः' इति अच्युते।

'राम-लक्ष्मणौ' इति दाशरथौ।

'रामार्जुनगतिस्तयोः' इति भार्गव-कार्तवीर्ययोः।

'स्थाणुं भज भवच्छिदे', इति हरे ।

'सर्वं जानाति देवः' इति युष्मदर्थे।

'कुपितो मकरध्वजः' इति कामे।

'देवस्य पुरारातेः' इति शम्भौ।

'मधुना मत्तः कोकिलः' इति वसन्ते।

'पातु वो दयितामुखम्' इति साम्मुख्ये।

'भात्यत्र परमेश्वरः' इति राजधानीरूपात् देशाद्राजनि।

'चित्रभानुर्विभाति' इति दिने रवौ रात्रौ वह्नौ।

'मित्रं भाति' इति सुहृदि ।

'मित्रो भाति' इति रवौ।

'इन्द्रशत्रुः' इत्यादौ वेद एव, न काव्ये, स्वरो विशेषप्रतीतिकृत्।

आदिग्रहणात् -

एद्दहमेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं।

एद्दहमेत्तावत्था एद्दहमेत्तेहि दिअएहिं ।।११।।

[एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।

एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ।।११।। इति संस्कृतम्]

इत्यादावभिनयादयः।

इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादनम्, तत्र नाभिधा नियमनात् तस्याः। न च लक्षणा मुख्यार्थबाधाद्यभावात्। अपितु अञ्जनं व्यञ्जनमेव व्यापारः। यथा -

भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य।

यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत् ।।१२।।

[सूत्रम् - ३३]

तद्युक्तो व्यञ्जकः शब्दः ।

तद्युक्तो व्यञ्जनयुक्त:

[सूत्रम् - ३४]

यत् सोऽर्थान्तरयुक् तथा।

अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ।।२०।।

तथेति व्यञ्जकः।

|| इति काव्यप्रकाशे काव्यस्य शब्दार्थस्वरूपनिर्णयो नाम द्वितीय: उल्लासः ||२||

ग्रंथ व हस्तलिखिते यांविषयी विनम्र आवाहन

ग्रंथ व हस्तलिखिते ही ज्ञानाचा खजिना आहेत, अनेक घरात बंदिस्त कपाटात हा दुर्मिळ खजिना धुळीत लोप पावत आहे. आम्ही आपणांस विनम्रपणे आवाहन करतो की, आपल्याकडे असलेले छापील व हस्तलिखित साहित्य, नियतकालिके, मासिके (जुनी,नवीन) 'संस्कृत ग्रंथालया'कडे जमा करावे. या ग्रंथालयाकडे संस्कृत वाङ्मय व संत साहित्य विषयक दुर्मिळ ग्रंथ जमा आहेत . अनेक अभ्यासक, संशोधक यांचा लाभ घेत आहेत. आपला बहुमूल्य ठेवा पुढच्या पिढीला ज्ञानासाठी मिळत राहील. तरी आपण सहकार्य करावे.ही विनंती.

इच्छुकांनी पुढील पत्त्यावर संपर्क साधावा.

गीर्वाणज्योति संस्कृत ग्रंथालय,
कारंजकरनगर, पारशी विहिरीजवळ,
विलासपूर, सातारा – ४१५ ००१
(सं.क्र. ९८२२०९७५०७)
E-mail: geerwanlib@gmail.com

गीर्वाणज्योति प्रकाशन

संस्कृत नेट/ सेट परीक्षा देणाऱ्यांसाठी सुवर्ण संधी

संस्कृत NET/ JRF/ SET

Subject code = 25

online सराव प्रश्नपत्रिका

- अभ्यासक्रमातील १० ही घटकांवर प्रश्न
- प्रश्नांची पुनरावृत्ती नाही
- प्रश्नांची तात्काळ उत्तरे
- प्रगती आलेख
- प्रतिसंच= १२ प्रश्नपत्रिका = १२०० प्रश्न
- सोडवलेली प्रश्नपत्रिका अनेकदा सोडवू शकता
- मोबाईलवर देखील प्रश्नपत्रिका सोडवू शकता

Subscribe करण्यासाठी खालील link वर click करा.

https://forms.gle/k9cEunP8ahTJXWKr5

SUBSCRIPTION FEE:

प्रति संच = रु.५००/-

एकूण ३ संच= रु.१५००/-

नमुना प्रश्नपत्रिकेसाठी खालील link वर click करा.

https://forms.gle/AHZYx35me7i1em687

पैसे भरण्यासाठी संपर्क :-
गीर्वाणज्योति प्रकाशन,
पारशी विहिरीजवळ, कारंजकरनगर,
विलासपूर, सातारा, महाराष्ट्र ४१५००१
भ्रमणध्वनी ९१+ : ९८२२०९७५०७

ONLINE PAYMENT:

ACCOUNT NAME – GEERWANJYOTI

ACCOUNT NO. 037004042209195001

IFSC - CSBK0000370

BANK NAME - CATHOLIC SYRIAN BANK (CSB)

BRANCH – SATARA

UPI- geerwanajyotiprakashan@oksbi

Gpay- 9822097507

geerwanajyotiprakashan@oksbi

UPI BHIM Paytm Accepted Here G Pay



गीर्वाणज्योती प्रकाशन, सातारा

1. मैत्री शुद्धलेखनाशी, प्रा.गजानन चव्हाण , डॉ.शिवदास जाधव
2. छात्र संस्कृत शब्दकोश, डॉ.शिवदास जाधव व डॉ. नीलेश जोशी
3. Experimental Psychology, Maragam
4. निवडक अप्रसिद्ध उपनिषदे, डॉ. नीलेश जोशी
5. भामिनी विलास: प्रास्ताविक – अन्योक्ति – विलास:,डॉ.शिवदास जाधव
6. सार्थ निघण्टुकोश,डॉ. नीलेश जोशी
7. विभक्त्यर्थ प्रकरण, डॉ.शिवदास जाधव, डॉ. नीलेश जोशी
8. संज्ञाप्रकरणम्, डॉ.शिवदास जाधव
9. महात्मा गांधीप्रणीत शिक्षण संकल्पना, प्रा. सुरेखा मत्सावार
10. The Glorious Symbols of India as UNESCO's World Heritag, Prof. Sandeep Dhikale
11. अभितः परितः, डॉ. सौ. प्रज्ञा शरद देशपांडे
12. अनन्तयात्रा , ज्योती पुजारी
13. अथातो ब्रह्मजिज्ञासा- डॉ. शैलजा बापट
14. साहित्यदर्पणः- प्रथम-परिच्छेदः- डॉ.शिवदास जाधव, डॉ. नीलेश जोशी
15. पाण्डुरङ्गाष्टकम् डॉ.शिवदास जाधव
16. श्रीकल्किस्तोत्रम् डॉ.शिवदास जाधव
17. मराठीचे संशोधन (भाषा आणि साहित्य)- डॉ. अनिल गवळी
18. रघुवंशम् प्रथमः सर्गः- मराठी अनुवाद, परिशिष्टे- डॉ. शिवदास जाधव, डॉ. शशिकांत दरगू
19. वेदान्तसारः- डॉ. शिवदास जाधव
20. तर्कभाषा - डॉ. शिवदास जाधव
21. नलचम्पूः - डॉ. शिवदास जाधव
22. ईशावास्योपनिषत् - डॉ. शिवदास जाधव

- Contact Us:
- Geerwanjyoti Publication,
- Karanjkarnagar, Near Parashi Vihir, Vilaspur, Satara, Maharashtra, India. 41500
- Mobile: +919822097507